Bal Bharati
PUBLIC SCHOOL
Dwarka

# संस्कृतालोकः

अप्रैलमासः 2023



## संस्कृतिः संस्कृताश्रिता

**ऋषीणामाद्यानां गहनमननावाप्तसुयशाः,**
**श्रुतीनां शास्त्राणां निखिलगुण- तत्त्वार्थनिलया ।**
**पुरातत्त्वाधारा सकलभव - ज्ञानाब्धिविभवा,**
**जयेद् दैवी वाणी त्रिभुवनमनोज्ञा बुधप्रिया ।।**

जो परिष्कृत, शुद्ध और व्याकरण आदि अन्य त्रुटियों से मुक्त है, उसी का नाम संस्कृत है। जिस परिष्कृत भाषा का प्रयोग प्राचीन ऋषि-मुनियों ने भाषागत त्रुटियों को परिष्कृत करने और अपशब्दों और अन्य त्रुटियों को रोकने के लिए किया था, उसे संस्कृत भाषा के रूप में संबोधित और सम्मानित किया जाता है। भारतीय परंपरा के अनुसार संस्कृत भाषा का न आदि है और न अंत। यह शाश्वत, दिव्य और चिरस्थायी है। इसका सर्वप्रथम प्रयोग वेदों में हुआ और तत्पश्चात् अन्य क्षेत्रों में यह अभिव्यक्ति का साधन रही है । संस्कृत को इण्डो-आर्यन या इण्डो जर्मनिक भाषा-परिवार से संबंधित कहा जाता है जिसमें ग्रीक, लैटिन और अन्य समान भाषाएं शामिल हैं। विलियम जोन्स, जो पहले से ही ग्रीक और लैटिन से परिचित थे, जब संस्कृत के संपर्क में आए, तो टिप्पणी की कि संस्कृत ग्रीक की तुलना में अधिक परिपूर्ण है, लैटिन की तुलना में अधिक प्रचुर है और दोनों की तुलना में अधिक परिष्कृत है। उन्होंने कहा - "संस्कृत एक अद्भुत भाषा है"। भारत में संस्कृत भाषा को जानने , समझने और बोलने वालों की संख्या विश्व में सर्वाधिक है लेकिन यह उल्लेखनीय है कि प्राचीन और शास्त्रीय, संस्कृत अभी भी कहीं न कहीं दुनिया के अन्य हिस्सों अमेरिका,ब्रिटेन,नीदरलैण्ड , स्वीडन,थाईलैण्ड और जर्मनी आदि देशों में विद्वानों द्वारा अभिव्यक्ति के माध्यम के रूप में उपयोग की जा रही है। महात्मा गाँधी जी ने कहा था - 'संस्कृत और संस्कृति साथ-साथ चलते हैं। शिक्षा मातृभाषा के माध्यम से प्रदान की जानी चाहिए लेकिन साथ ही साथ संस्कृत शिक्षा भी साथ-साथ चलती रहनी चाहिए क्योंकि संस्कृत शब्दों की ध्वनि ही हमारी भारतीय सभ्यता को एक प्रतिष्ठा और शक्ति प्रदान करती है ।' भारत सरकार द्वारा जारी नई राष्ट्रिय शिक्षा नीति- 2020 के अन्तर्गत संस्कृत भाषा के प्रचार, प्रसार और वृद्धि के लिए विभिन्न पहलों की परिकल्पना की गई है। संस्कृत भाषा को प्रासंगिक और जीवंत बनाए रखने के लिए पाठ्य- पुस्तकों, कार्यपुस्तिकाओं, वीडियो, नाटकों, कविताओं, उपन्यासों, पत्रिकाओं आदि सहित उच्च गुणवत्ता वाली शिक्षा और प्रिंट सामग्री के निरंतर प्रयोग की बात कही गई है । चाईल्ड एजुकेशन सोसायटी अपने स्थापना वर्ष से लेकर आज तक निरंतर संस्कृत-भाषा के समुत्थान और प्रगति के लिए कार्य करते हुए अपने ध्येय वाक्य 'हंसो नयतु नः प्रज्ञाम्' को सार्थक कर रही है। बाल-भारती पब्लिक स्कूल, द्वारका अपने विद्यालय परिसर में छात्रों को संस्कृत के अनुपम ज्ञान से अवगत कराने के लिए निरन्तर कार्यरत है । छात्रों के बीच संस्कृत भाषा के प्रति रुचि पैदा करने के लिए विद्यालय में समय-समय पर विभिन्न भाषागत गतिविधियों, प्रतियोगिताओं और संस्कृत-सप्ताह का आयोजन किया जाता है। संस्कृत छात्रों की उपलब्धियों को चिह्नित कर यथासमय उन्हें प्रोत्साहित एवं पुरस्कृत किया जाता है । भविष्य में विद्यालय और भी अधिक प्रभावी कदमों के साथ छात्रों में संस्कृत संवर्धन के लिए कृतसंकल्पित है । इति शम्।।

**(सर्वे भद्राणि पश्यन्तु, मा कश्चित् दुःख-भाग्भवेत् ।)**

**– सुरुचि गाँधी (प्रधानाचार्या)**



# लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि ।

**(भाषासु मधुरा मुख्या दीव्या गीर्वाणभारती ।)**

नमः संस्कृताय । यदि भारतस्य सर्वाङ्गीणा समुन्नतिः काम्यते , सर्वसुखदो विकासश्चाभिलष्यते तर्हि संस्कृतस्य प्रचारः , प्रसारश्च नितराम् अनिवार्यम् । वैदिकसाहित्याद् उद्भूता सेयं संस्कृतभाषा-परम्परा अद्यावधि जीवतितमाम् । हर्षस्य अयं विषयो यदद्यत्वे अपि संस्कृतसाहित्यं , काव्यानि, नाटकानि , गद्यसाहित्यम् , पत्र-पत्रिकाश्च प्रतिसम्वत्सरं प्रकाश्यन्ते , सहस्रशो लक्षशश्च तेषामध्येतारः दरीदृश्यन्ते । अधुना राष्ट्रिय-शिक्षा-नीतिः 2020 इत्यस्यान्तर्गतं भारतसर्वकारः अपि अस्मिन् विषये जागरूकतां प्रदर्शयति । छात्राणां संस्कृतं प्रति रुचिं वर्धयितुं , विद्यालये संस्कृतवातावरणं समुन्नतिं नेतुं च समये-समये विविधाः गतिविधयः छात्राः कुर्वन्ति । तेषामेव विवरणं अत्र पत्रिकायां प्रस्तूयते सहैव विद्यालयस्य संस्कृतच्छात्राणाम् उपलब्धयः अपि अत्र प्रकाश्यन्ते । विद्यालयस्य प्रधानाचार्यायाः श्रीमती सुरुचि-गाँधी-वर्यायाः दिशानिर्देशे मार्गदर्शने च अस्याः पत्रिकायाः सफलप्रकाशनं क्रियते। संस्कृतभाषां प्रति तस्याः प्रगाढस्नेहं विद्यालये संस्कृतस्य प्रसाराय निरन्तरं कार्यं च श्लाघ्यं वर्तते । **(सर्वे भवन्तु सुखिनः ।)**

**- नरेन्द्रदत्तसेमवालः (संस्कृताध्यापकः /टी.जी.टी.)**

## बाल भारती पब्लिक स्कूल, द्वारकायाः 'बाल-चित्रकाराः'





## विद्यायाः फलम्

*विद्या ददाति विनयम्*
*विद्या ददाति वित्तम् ।*
*विद्या सदा जनानाम्*
*विमलं करोति चित्तम् ॥1॥*

*विद्या तनोति कीर्तिम्*
*विद्या तनोति मानम् ।*
*विद्या नरं समाजे*
*कुरुते सदा प्रधानम् ॥2॥*

*विद्या निहन्ति दोषम्*
*विद्या निहन्ति भारम् ।*
*दूरीकरोति विद्या*
*सकलं मनो-विकारम् ॥3॥*

*विद्या न राज-हार्या*
*विद्या न चौर-हार्या ।*
*विद्या कदापि लोके*
*नहि बन्धुभिः विभाज्या ॥4॥*



## किमर्थं संस्कृतं पठेम....



संस्कृत भाषा अस्माकं देशस्य प्राचीनतमा भाषा अस्ति। प्राचीनकाले सर्वे एव भारतीयाः संस्कृतभाषाया एव व्यवहारं कुर्वन्ति स्म। कालान्तरे विविधाः प्रान्तीयाः भाषाः प्रचलिताः अभवन्, किन्तु संस्कृतस्य महत्त्वम् अद्यापि अक्षुण्णं वर्तते। सर्वे प्राचीनग्रन्थाः चत्वारो वेदाश्च संस्कृतभाषायामेव सन्ति। संस्कृतभाषा भारतराष्ट्रस्य एकतायाः आधारः अस्ति। संस्कृतभाषायाः यत्स्वरूपम् अद्य प्राप्यते, तदेव अद्यतः सहस्रवर्षपूर्वम् अपि आसीत्। संस्कृतभाषायाः स्वरूपं पूर्णरूपेण वैज्ञानिक अस्ति । अस्य व्याकरणं पूर्णतः तर्कसम्मतं सुनिश्चितं च अस्ति ।

आचार्य- दण्डिना सम्यगेवोक्तम्
**"भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।"**

अधुनाऽपि सङ्गणकस्य कृते संस्कृतभाषा अति उपयुक्ता अस्ति। संस्कृतभाषैव भारतस्य प्राणभूता भाषा अस्ति । राष्ट्रस्य ऐक्यं च साधयति । भारतीयगौरवस्य रक्षणाय एतस्याः प्रसारः सर्वैरेव कर्त्तव्यः । अतएव उच्चते-'संस्कृतिः संस्कृताश्रिता ।'

ईशानवी सिंह / षष्ठी-ई

# उपलब्धयः ...





आयति कालरा

## दशम-कक्षायाः सी.बी.एस्.ई बोर्ड-परीक्षायां संस्कृतविषये 100 अङ्कान् प्राप्तवत्याः 'आयति कालरा' इत्यस्याः साक्षात्कारः......

अभिवादनम् .......

भारतीयसंस्कृतेः वाहिका 'देवभाषा संस्कृतम्'सर्वभाषाणां जननी । यदि भवान् भारतीयज्ञानस्य स्त्रोतांसि –वेद-पुराण-उपनिषद्-आदीन् ज्ञातुम् अवगन्तुं च इच्छति तर्हि 'संस्कृत'भाषायाः ज्ञानं सर्वथा आवश्यकम्। बाल्यकालात् एव मम 'संस्कृत' विषये रुचिः आसीत् यदा मम पितामही ईश्वरं पूजयन्ती सुमधुरस्वरेण संस्कृतश्लोकं गायति स्म। अत एव विद्यालये अपि मया 'संस्कृतम्' विषयरूपेण प्रचितम्। अस्माकं विद्यालयस्य संस्कृत-शिक्षकस्य कृते अपि अहम् अत्यन्तं कृतज्ञा अस्मि यत् तस्य मार्गदर्शनं संप्राप्य अनुसरणं च विधाय अहं सी.बी.एस्.ई बोर्ड-परीक्षायां संस्कृत-विषये शतप्रतिशतम् अङ्कान् प्राप्तवती। अहं मम सर्वेभ्यः कनिष्ठ-भ्रातृभ्यः भगिनीभ्यः च एतत् सन्देशं दातुम् इच्छामि यत् 'संस्कृत'भाषा सरला मधुरा च अस्ति अस्याः अवगमने किमपि काठिन्यं नानुभूयते । केवलं रुचिः, समर्पणं, जिज्ञासा चेत्यादीनां गुणानाम् आवश्यकता अस्ति ।


अर्चिता बोरा

## संस्कृत-गायनस्य क्षेत्रीय-मण्डलस्तरीय-स्पर्धयोः प्रथम-स्थानं प्राप्तवत्याः सप्तम-कक्षायाः छात्रा 'अर्चिता बोरा' इत्यस्याः अनुभवाः ......

संस्कृतस्य क्षेत्रस्तरीय-काव्यपाठ-प्रतियोगितायां भाग-ग्रहणस्य मम अनुभवः
अतीव प्रियः आसीत् । एषः अनुभवः मत्कृते नूतनः आसीत् तदापि अहं गायनाय अतीव उत्साहिता आसम् । यदा अहं क्षेत्रस्तरीय-गायन-प्रतियोगितायां प्रथमस्थानं प्राप्तवती तदा अहं बहु-प्रसन्ना अधिगतसुखा आश्चर्यचकिता च अभवम् । अहं मन्ये यत् नूतनान् अवसरान् प्राप्य तेषु सफलतामधिगन्तुं प्रयासाः अवश्यमेव विधातव्याः , यतो हि भवन्तः कदापि न जानन्ति यत् परिणामः किं भवितुम् अर्हति। क्षेत्रस्तरीय-मण्डलस्तरीय-स्पर्धयोः मया विजयः अपेक्षितः नासीत्, परञ्च मदीयोपलब्धौ अहं गौरवान्विता अस्मि । अहं मदीयाय शिक्षकाय धन्यवादं दातुम् इच्छामि येन एषः सुखदानुभवः सम्प्रापितः ।







# कक्षा-गतिविधयः

## परियोजनाधारिताः चित्राधारिताः च

संस्कृतच्छात्रैः कक्षायां परियोजनाधारिताः चित्रनिर्माणाधारिताः च विविधाः गतिविधयः क्रियन्ते।








# क्रीडनकनिर्माणेन शिक्षणम्














छात्राः विविधानां क्रीडनकानां निर्माणं विधाय तेषां माध्यमेन विषयगतं ज्ञानम् अर्जयन्ति । एतादृशैः प्रायोगिक-क्रियाकलापैः विद्यार्थिनां बौद्धिकक्षमतायाः तार्किकक्षमतायाः च अनवरतं विकासः भवति ।

# पठामि संस्कृतं नित्यं
# वदामि संस्कृतं सदा ......




यश्वी योगिता च







अस्मि गुप्ता

# विनोद-कणिका




# प्रहेलिका

न तस्यादिः न तस्यान्तः
मध्ये यः तस्य तिष्ठति।
तवाप्यस्ति ममाप्यस्ति
यदि जानासि तद्वद।।

## शब्द प्रहेलिका

| | | | | | |
|---|---|---|---|---|---|
| वा | य | तो | सं | स | र |
| च | रि | य | क | लि | आ |
| ग | ठ | म् | च | ल | व |
| नि | उ | ऋ | प | म् | ति |
| अ | म् | बु | च | क्ष | ग |
| श | स | नी | र | म् | प्र |

अस्याम् शब्द-प्रहेलिकायां 'जल' शब्दस्य पर्यायवाचि-शब्दाः विद्यन्ते । यदि भवान् चतुरः अस्ति तर्हि तेषाम् अन्वेषणं करोतु ।

# प्रश्नमञ्चः

**पञ्चतन्त्रम् - इत्यस्य लेखकः कः?**

विष्णुशर्मा | वेदव्यासः | कालिदासः

**रामायणे कस्य अन्यनाम "दाशरथिः"?**

रामः | हनुमान | भरतः

**वेदाः कति सन्ति ?**

चत्वारः | पञ्च | दश

**महाभारतानुसारं "देवव्रतः" कः?**

अर्जुनः | कर्णः | भीष्मः

**श्रीकृष्णः अर्जुनाय महाभारतयुद्धसमये किं बोधितवान् ?**

रामायणम् | गीताम् | मानसम्

**महाभारतं कः रचितवान् ?**

कालिदासः | व्यासः | भासः

## किं भवन्तः जानन्ति

आकाशवाण्यां प्रथम-संस्कृत-वार्तायाः प्रसारणं चतुस्सप्तत्यधिक-नवदशतमाब्दे (1974) जून(06)-मासस्य त्रिंशद्दिनांके (30) प्रातः नव-वादने अभवत् ।

मार्गदर्शिके -
सुरुचि-गाँधी (प्रधानाचार्या)
संध्या-कक्कड़ः (उपप्रधानाचार्या)

पत्रिकानिर्माणं आवरणं सज्जीकरणं च -
नरेन्द्र-दत्त-सेमवालः
(संस्कृताध्यापकः टी.जी.टी)